

# কাশী বিশ্বনাথাষ্টকম্-গংগা তরংগ রমণীয জটা কলাপং

https://www.chalisa.online

|| কাশী বিশ্বনাথাষ্টকম্ ||
গংগা তরংগ রমণীয জটা কলাপং
গৌরী নিরংতর বিভূষিত বাম ভাগং
নারাযণ প্রিযমনংগ মদাপহারং
বারাণসী পুরপতিং ভজ বিশ্বনাধং ॥ 1 ॥
বাচামগোচরমনেক গুণ স্বরূপং
বাগীশ বিষ্ণু সুর সেবিত পাদ পদ্মং
বামেণ বিগ্রহ বরেন কলত্রবংতং
বারাণসী পুরপতিং ভজ বিশ্বনাধং ॥ 2 ॥
ভূতাদিপং ভুজগ ভূষণ ভূষিতাংগং
ব্যাঘ্রাংজিনাং বরধরং, জটিলং, ত্রিনেত্রং
পাশাংকুশাভয বরপ্রদ শূলপাণিং
বারাণসী পুরপতিং ভজ বিশ্বনাধং ॥ 3 ॥
সীতাংশু শোভিত কিরীট বিরাজমানং
বালেক্ষণাতল বিশোষিত পংচবাণং
নাগাধিপা রচিত বাসুর কর্ণ পূরং
বারাণসী পুরপতিং ভজ বিশ্বনাধং ॥ 4 ॥
পংচাননং দুরিত মত্ত মতংগজানাং
নাগাংতকং ধনুজ পুংগব পন্নাগানাং
দাবানলং মরণ শোক জরাটবীনাং
বারাণসী পুরপতিং ভজ বিশ্বনাধং ॥ 5 ॥
তেজোমযং সগুণ নির্গুণমদ্বিতীযং
আনংদ কংদমপরাজিত মপ্রমেযং
নাগাত্মকং সকল নিষ্কলমাত্ম রূপং
বারাণসী পুরপতিং ভজ বিশ্বনাধং ॥ 6 ॥
আশাং বিহায পরিহৃত্য পরশ্য নিংদাং
পাপে রথিং চ সুনিবার্য মনস্সমাধৌ
আধায হৃত্-কমল মধ্য গতং পরেশং
বারাণসী পুরপতিং ভজ বিশ্বনাধং ॥ 7 ॥
রাগাধি দোষ রহিতং স্বজনানুরাগং
বৈরাগ্য শাংতি নিলযং গিরিজা সহাযং
মাধুর্য ধৈর্য সুভগং গরলাভিরামং
বারাণসী পুরপতিং ভজ বিশ্বনাধং ॥ 8 ॥
বারাণসী পুর পতে স্থবনং শিবস্য
ব্যাখ্যাতং অষ্টকমিদং পঠতে মনুষ্য
বিদ্যাং শ্রিযং বিপুল সৌখ্যমনংত কীর্তিং
সংপ্রাপ্য দেব নিলযে লভতে চ মোক্ষং ॥
বিশ্বনাধাষ্টকমিদং পুণ্যং যঃ পঠেঃ শিব সন্নিধৌ
শিবলোকমবাপ্নোতি শিবেনসহ মোদতে ॥

|| https://www.chalisa.online ||